श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीमद्वेङ्कटाध्वरि विरचितम्

# ॥ श्रीलक्ष्मीसहस्रम् ॥

## ॥ यमकस्तबकः ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ यमकस्तबकः ॥

यशस्विनीमुपासीय यदुनाथसधर्मिणीम्।
यमकं कथयन्त्यार्या यत्पदं कल्पशाखिनः॥ १ ॥

दयासंपूर्णहृदया मया कृतमनामया।
रमा गुणेन परमा स्तवं गृह्णातु वास्तवम्॥ २ ॥

मातस्त्वदङ्घ्रौ मम देहि भक्तिं मातः परस्मिन् हृदयं प्रसाङ्क्षीत्।
सा कंसशत्रोर्दयिते शुभेन साकं चरीकर्त्यशुभप्रशान्तिम्॥ ३ ॥

रमारमापत्तिमपास्यतां मे दयोदयोपेक्षितभक्तमन्तुः।
मुदामुदारां च दिशेत् समृद्धिं नतानतापान् कुरुते यदीक्षा॥ ४ ॥

रमे पदाब्जे तव ते मनोरमे नमेयमुच्चैरितरा गतिर्न मे।
सुरेश्वरो यद्भजनेन भासुरे पदे पुना राजति दैत्यलोपदे॥ ५ ॥

उदारविभवा भवामयहरा हरादिमहिता हिताय कमला।
सुधौघसदृशा दृशा शुभदया दयालुरधुना धुनातु दुरितम्॥ ६ ॥

घनाघनाभस्य धनाघनाशिनः सदा सदाचारसदा सदार्यधीः।
हिताहिताक्ष्यौ रहिताहिता मनोरमेऽरमेवाचर मे रमे मुदम्॥ ७ ॥

सरोरुहारामगृहां सुमल्लिका सरोरुहारां कमलां मधुद्विषः।
भुजान्तरामोदकरीं नुमः क्षमा भुजां तरामोऽनुसृतिं व्यथाम्बुधिम्॥ ८ ॥

नृपो निरास्थः सुमनोजने यो मनोजनेयो न हि तेन मेऽर्थः।
स्थितां प्रणम्यासमुरस्यहं तु मुरस्य हन्तुः स्वयमिन्दिरे त्वाम्॥ ९ ॥

दृष्टिर्दयैकावनि ते रमे नश्छिनत्तु विष्णोर्वनितेऽरमेनः।
भवे तवास्येयमपीडनेन कुतः क्षतिर्मे यमपीडनेन॥ १० ॥

कुभूभुजां सम्प्रति माननेन फलं सुधांशुप्रतिमानने न।
शुभं प्रयच्छाविकलं कलेशस्वसस्त्वहं स्यां विकलङ्कलेशः॥ ११ ॥

करोतु मोदं कमला समुन्मिषत्कलाविलासा रसिनी विभावसौ।
कृपानिधौ वेङ्कटशैलनायके कलाविला सारसिनी विभावसौ॥ १२ ॥

योगाय यो गायति भावुकेन रामे वरामेव हरेस्तवाख्याम्।
नालीकनालीकसवित्रि धाम तेनाक्षतेनाक्षतमाप्यते तत्॥ १३ ॥

नृणां दृशं सार्थयितुं तवाभूद्रमे यदेहा नरमेयदेहा।
प्राप्ता तदा त्वं फणिराजशैलवनारिकेलां नवनारिकेलाम्॥ १४ ॥

त्वयाश्रितस्यात्र परत्र चोच्चैरकारि रा मे नरकारिरामे।
गोपालकं त्वं नयसे रसं या गवा समेतं नगवासमेतम्॥ १५ ॥

शुद्धया त्वदभिधा सहस्रकं यो गिरा जपति ना समन्ततः।
त्वं विदुर्हरिसखि त्रयीविदो योगिराजपतिना समं ततः॥ १६ ॥

दानश्रिया विहसितामरसालयेतां
    तापापहां जननि तामरसालये ताम्।
पादद्वयीं स हि भजेद्रुचिरागमां ते
    यस्यास्ति निर्मलधियो रुचिरागमान्ते॥ १७ ॥

वशितसर्वजगत्पतिरक्षया दृगशुभं तव लुम्पति रक्षया।
हृदयमुज्झतु देवि न मामकं त्वदिनमन्यमितोऽपि नमाम कम्॥ १८ ॥

त्यजति यच्छुभलाभवती न तान् जननि मत्प्रभृतीन् भवती नतान्।
मिलति मे न यथा मतिरंहसा मम तथा दयतामतिरंहसा॥ १९ ॥

पद्मेऽस्तुतुभ्यं प्रथमा नमस्या स्थिरं फलं हि प्रथमानमस्याः।
विधाय मान्यामहतामहं तां हराम्यरीणां महतामहन्ताम्॥ २० ॥

भवत्यजेयं तनुतेऽजसेव्या जनाय लोकं दययैव तं श्रीः।
भवत्यजे यं तनुतेजसे व्याध्यघोज्झितं मे कुहृदेऽपि दत्ते॥ २१ ॥

निधाय भवती दृशं नवसरोजपत्रायतां
श्रितं हरिपुरन्ध्रि मां हृतनमद्वित् त्रायताम्।
न मां किल विना त्वयापदि तमःकदम्बादयः
कठोरहृदयो हरिःखलजनेऽस्मदम्बादयः॥ २२॥

न स माधवस्तव गुणानसमायतनेत्र एव कमलायतने।
क्षमतेऽभिधातु मतिदक्षमतेः स्तवनाय कः पटुमतिस्तव ना॥ २३॥

भवती जगदम्ब कृतार्तभवोपरमा परमा परमाप रमा।
कुहृदोऽद्रितटीमवनाय कृपा महिता महितामहितामहिता॥ २४॥

रमार मारमारमाद्युपासितं यमर्णवात्।
धियो हरिं वृषाचलोत्तमेतमेतमेत मे॥ २५॥

त्रातुमप्रच्युता वारिजातेक्षणा
त्वं नतात् ध्वस्तदेवारिजाते क्षणात्।
पातकादिन्दिरे पाहि मां शोभित
श्रीरघध्वान्तलोपाहिमांशोऽभितः॥ २६॥

मन्दारामन्दारामं दारा मन्दाराद्व्याधिघ्ना दैत्यारेः शेषाद्रिं तं प्राप्ताः।
सारावासारावासारावासारावागालीढा शृङ्गाली यस्यार्तान् संभर्तुम्॥ २७॥

शमदमौ मदमौढ्यहरौ वहन् मधुरिपुं धुरि पुण्यकृतां स्थितः।
विनमतीनमतीव तवार्चको निजगदं जगदम्ब जहाति च॥ २८॥

जननि त्वया परिचरत्सुरकिन्नरकान्तया नयजुषा स्तुतया।
हृदि मे विना किमपि क्लृप्तनमन्नरकान्तया न यजुषा स्तुतया॥ २९॥

त्वमेव सेव्या सुदृशां तव स्थिरं रमे यतो यादवनायके बलम्।
उरो हि शौरेरुदधेस्त्वमग्रहीरमेयतोयादवनाय केवलम्॥ ३०॥

सारसं श्रितवती ससारसंमाननां हिमकरोपमाननाम्।
देवतां प्रणमतो मुदेव तां वेदनादमहितां न वेदना॥ ३१॥

सा मयि देयादीक्षां रमार्तरक्षार्थमाददे या दीक्षां।
यत्पदजलजनतानां सुगमं दिव्यधाम जलजनतानाम्॥ ३२ ॥

कमले राजीवानां कुले स्थिता त्वं गतिः परा जीवानाम्।
जगदाराध्या यन्ति श्रेयस्त्वां ये कृतादरा ध्यायन्ति॥ ३३ ॥

किमपि महोदारेषु प्रथमं मधुवैरिणो महो दारेषु।
जयति सपर्या यस्य स्थिरफलदात्री सुरद्रुपर्यायस्य॥ ३४ ॥

विधृतां हरिणाङ्केन त्वां प्रतिवददाननां हि हरिणाङ्केन।
प्रणमन् जननि बिडौजा जनो भुवि स्यात् स्वबन्धुजननिबिडौजाः॥ ३५ ॥

कलशोदधिकन्या यं पश्यति विद्यात् स तावदधिकन्यायम्।
जितकथकवितानेन त्रयीविदा लभ्यते च कवितानेन॥ ३६ ॥

श्रीः सेवानरकेषु त्वयार्थ्यतां हरिरिताढ्यवानरकेषु।
मां विनिपात्य न घोराः शुचो यथा नयति किन्तु पात्यनघोराः॥ ३७ ॥

सततविकाराकल्पं प्राप्तोऽहं देहमम्ब काराकल्पम्।
कुभवादाशु भवत्या स्वयमुद्धार्यो रमे सदा शुभवत्या॥ ३८ ॥

सारासाराज्ञानस्थानेन किमस्ततेजसा राज्ञा नः।
श्रीस्त्वयि मानसमेतद्न्यस्येम विमुक्तयेऽभिमानसमेतम्॥ ३९ ॥

व्यक्तिं विन्देमहि तामिन्द्रादिसुरैर्नवारविन्दे महिताम्।
मध्यमतारकवर्णाभिहिता या नखजितोरुतारकवर्णा॥ ४० ॥

हृतसदरिद्रव्याधिश्रितमुच्छिन्नदुर्दरिद्रव्याधिः।
अतुलकृपा या देवप्रणुता सा रमात्र पायादेव॥ ४१ ॥

शोषितभवनदयागस्तन्येशः कचजितोत्प्रभवनदयागः।
सोऽनभिभवनदयागः सोढा प्रभवेत् त्वया भवनदयागः॥ ४२ ॥

त्वां हि सुधी राजयति स्तुतां स्तवैर्यः प्रमानिधी राजयतिः।
भवति स धी राजयति श्रीस्तं स भुवोऽत्र सोदधीरा जयति॥ ४३ ॥

भक्ततमानायतया स्वदृशा कमले सुरोत्तमानायत या।
विश्रुतमानायतया शमय भवं श्रेयसेऽसमानाय तया॥ ४४ ॥

श्रीः परभागवती यम्यभिष्टुता सा मुकुन्दभागवती यम्।
फणिवृषभागवतीयं पश्यति भजते पदं स भागवतीयम्॥ ४५ ॥

मिथ्यातनयाचार्यारहितेनान्तस्त्वयाब्धितनया चार्या।
त्वं चित्त न याचार्याप्रभृतीरितरा नमच्छ्रितनयाचार्याः॥ ४६ ॥

मां हरिरामायतया दृशा पुनात्वेनसां विरामाय तया।
प्रथितकरामायतया काकेऽप्यसुरे परां कृपामायतया॥ ४७ ॥

राशेर्वारामस्य श्रीस्त्वं दुहिता नवोत्सवारामस्य।
अवनिभवा रामस्य प्रिया धियं नः सदोषवारामस्य॥ ४८ ॥

हरिसुरदारुण्ये नःस्थितिमुषि वल्लिवदभूद्यदारुण्येन।
भृतवन्दारुण्येनत् त्वीडे दैवतमसङ्गि दारुण्येन॥ ४९ ॥

श्रीर्हितकरवाणी यान् पश्यति तेभ्यो नमांसि करवाणीयान्।
हृतशोकरवाणीयान् हातुमनर्थान्सुमप्रकरवाणीयान्॥ ५० ॥

महोदयासारभुजात्वयातया महोदया सारभुजा त्वया तया।
विलोपकारातिशयास्तदे विभाविलोपकारातिशयास्त देवि भा॥ ५१ ॥

सुरक्षया देवहिता दृशावमासुरक्षयादेव हि तादृशाव मा।
मुदा रमे धेहि गिरा विहानतामुदारमेधेऽहिगिराविहानता॥ ५२ ॥

केवलं तुच्छविमता हरिणा क्षितवामताः।
के वलन्तु च्छविमता हरिणाक्षि तवामताः॥ ५३ ॥

वैरस्य हानिदानेन मान्यासाध्येन साद्य तु।
वैरस्यहानिदानेन मान्या साध्येन सा द्यतु॥ ५४ ॥

वृषाचलेऽशङ्करतोद्यमानवृषाचले शङ्करतोद्यमा न।
वृषाचलेशं करतोद्यमानमम्ब त्यजेर्वष्टि दृशो गिरस्ते॥ ५५ ॥

राजीवायतनागबाहुमहतीं कुर्यान्मुदे नः कृपां
    राजीवायतनागबाहुरघहृत् कृष्णो न देवोऽपरः।
रा जीवाय तनाविहापि सुखदा शुद्धा तवैवाप्यते
    राजीवायत नायकं फणिगिरेर्यासौ दयास्रोतसाम्॥ ५६ ॥

कौमारमारचयतः सफलं तपोऽस्य
    सा मारमारकनुतस्य वृषाचलेन्दोः।
रामा रमा रहितकोपतया कृतास्मत्-
    क्षेमारमारविसुधांशु जयत्यवन्याम्॥ ५७ ॥

कलितमसारमनाशाध्यायामहितं न रामरामान्यम्।
कलितमसारमनाशा ध्यायाम हि तन्नरामतं नरामान्यम्॥ ५८ ॥

सारसेनमहितापहारिकासारसेनमहितापहारिका।
सारसेन महिताप हारिकानन्तगा जयति सानघं रमा॥ ५९ ॥

त्वं गतिं जननि यच्छ वैभवीं मा नयामि तरसामहो दयाम्।
मानयामितरसामहोदयां मानयामितरसामहोदयाम्॥ ६० ॥

मारमातरणिमानमस्यतां मा रमातरणिमानमस्यताम्।
मारमातरणिमानमस्यतां मारमातरणि मानमस्य ताम्॥ ६१ ॥

॥ इति श्रीमद्वेङ्कटाध्वरिविरचिते श्रीलक्ष्मीसहस्रे यमकस्तबकः ॥